श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनृसिंहराघवदासेन कृतं

# ॥ श्रीवेदान्तरामानुजमहादेशिकन् मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेदान्तरामानुजमहादेशिकन् मङ्गळम् ॥

विवेक वृत्त वैराग्य निधिः नित्यप्रियं वदः।
वेदान्तलक्ष्मणमुनिः सन्निधत्ताम् सदा हृदि ॥ **1** ॥

सूरिसूक्तसुधासिक्तवचसे विजितात्मने।
श्रुत्यन्तलक्ष्मणाख्याय देशिकायास्तु मङ्गळम् ॥ **2** ॥

सूरयः स्ववचोमर्मव्याख्यानाय यदात्मना।
कृपयात्रागतास्सर्वे तस्मै भवतु मङ्गळम् ॥ **3** ॥

अपर्याप्तामृतासक्तचेतसे दीर्घबन्धवे।
दयार्द्रहृदयायास्तु गुरवे भूरि मङ्गळम् ॥ **4** ॥

शठकोपमुनिप्रोक्तशास्त्रतत्त्व प्रदायिने।
प्राचेतसादि हृद्यार्थ वेत्त्रे प्राज्ञाय मङ्गळम् ॥ **5** ॥

श्रीनाथो यामुनार्यश्च रामानुजमुनिस्तथा।
यद्रूपेणात्रावतीर्णाः तस्मै श्रेष्ठाय मङ्गळम् ॥ **6** ॥

वाचोविधेयवेदान्तयुग्माय विजितात्मने।
वागधीशावताराय तस्मै विज्ञाय मङ्गळम् ॥ **7** ॥

समालोडितशास्त्राय सारार्थामृतदायिने।
सद्भिर्नुताय सततं सर्वज्ञायास्तु मङ्गळम् ॥ **8** ॥

विक्रमाक्रान्तलोकाय विजिताखिलचेतसे।
विनतावनदीक्षाय तस्मै वेद्याय मङ्गळम् ॥ **9** ॥

वेदान्तलक्ष्मण मुनेः वेदार्थामृतवर्षिणः।
समात्तसकलार्थाय सारज्ञायास्तु मङ्गळम्॥ 10 ॥

हितं कराय लोकानां स्मितपूर्वाभिभाषिणे।
श्रेयः प्रदाय सर्वेषां तस्मै हृद्याय मङ्गळम्॥ 11 ॥

कलाधराय तप्तानां कलहंसस्वराय च।
कलिताखिलसौख्याय कलिहन्त्रेस्तु मङ्गळम्॥ 12 ॥

परवादीभहरये परिव्राजकभूभृते।
परिपालितशिष्याय पारज्ञायास्तु मङ्गळम्॥ 13 ॥

स्थिरचित्ताय सततं साधुवृत्त निषेविने।
सत्सम्प्रदायसिद्धाय तस्मै सेव्याय मङ्गळम्॥ 14 ॥

मीनपुष्येऽवतीर्णाय मानमेयविवेकिने।
ज्ञानदाय च सर्वेषां तस्मै नाथाय मङ्गळम्॥ 15 ॥

विदिताखिलवेद्याय वेदान्तार्थप्रदायिने।
श्रीमद्वेदान्तरामानुजाख्याय गुरवे नमः॥ 16 ॥

नृसिंहराघवाख्येन छात्रेणेह सतां मुदे।
प्रणीतं मङ्गळमिदं तनोतु भुवि मङ्गळम्॥ 17 ॥

॥ इति श्रीवेदान्तरामानुजमहादेशिकन् मङ्गळं समाप्तम्॥